शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥ 1 ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥ 2 ॥

ज्ञानानन्दमयं देवं निर्मल स्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥ 3 ॥

पुण्डरीकासनासीनं पाण्डुराभ्रेन्दु सन्निभम् ।
अखण्डबोध जनकं हयग्रीवमुपास्महे ॥ 4 ॥

गुरुभ्यस्तद् गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥ 5 ॥

श्री कृष्णवागीश यतीश्वराभ्यां संप्राप्त चक्राङ्कण भाष्य सारम्
श्री नूत्नरङ्गेन्द्र यतौ समर्पितस्वं श्री कृष्णमार्यं गुरुवर्यमीडे ।

विरोधे कार्तिके मासे शततारा कृतोदयम्
योगाचार्यं कृष्णमार्यं गुरुवर्यमहं भजे ॥ 1 ॥

शिष्यकं कृष्णमायर्स्य नाथवंशप्रदीपकम्
कल्याण गुणरूपन्तं श्रीदेशिकं नमाम्यहम् ।
प्रशान्तपुरुषाकारं विनियोगप्रचारकम्
विशेषवैदिकं सूरिं तं देशिकं स्मराम्यहम् ॥ 1 ॥

कृष्णसूरीदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्देहं योगदेशिकम् ॥ 2 ॥